(अध्याय-५)

(१)

अथविवरणे चतुर्थाध्यायप्रारंभः॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)



कै.टी.४
१

श्रीगणेशाय नमः ॥ द्व्योश्रो· नन्वेतस्मिन्नभावे केवलानामेव स्वादीनां प्रयोगः स्यादत आह परश्चेतीति· नन्वेवं धात्वादेरपि स्यादत आह। प्रत्यया
र्थेति· तत्र कर्मादिरर्थस्तादिष्वतत्संबंधयोग्यार्थस्याभिधायिनीत्यर्थः। ननु प्रत्याख्यातसूत्रमादायैतदाक्षेपो न युक्तोत आह सतिचेति·
एतदादिपंचमीनिर्दिष्टेस्तस्मादिति परिभाषया परत्वलाभेन हि तत्सूत्रं प्रत्याख्यातमिति भावः· प्रतिपादनपरत्वादिति परश्चेति सूत्रस्येति शे
षः ननु वचनांतराश्रयेणावचनांतराक्षेपो न युक्तोऽत आह सतिचेति· द्योतवाच्यार्थयोः संबंधी योर्थ इत्यर्थः प्रकृत्याक्षेपे इति
निस्याकांक्षत्वादित्यर्थः। प्रत्ययप्रति प्रकृत्या सह स्वार्थमभिदधत्प्रत्यय इति भावः· असतीहेति· सजातीयाधिकारांतरादर्शनेन पूर्वाधि
कारानिवृत्तिरयुक्तेत्यर्थः ननु एवं विशेषविहितत्वात् योप्यर्थः स्यादत आह वासरूपेति। ननु व्याख्यानादेव पूर्वाधिकारानिवृत्तिः
सिद्धेत्यत आह अप्रयेति ननु पदांतरवाच्यक्रियायोगात्कारकबोधकता स्यादीनामदर्शेति धातोर्न संनिधिः। ततो विधीयमानानां त
स्यात्वासंभवादित्यत आह तत्रयोपेति· प्रकृतिमात्राक्षेपे पचेः कर्मसु प्रक्षेपे कर्तृकर्मादावभिधेये जाद्यप उत्पत्तौ तेन स्यात् स्याद
योपि स्यादिति योजना प्रातिपदिकादिष्वेतु प्रकृत्यर्थाक्षेपे कर्माद्यसंभवादगत्या तयास्वीकार इति भावः। नन्वेवमपि धात्वर्थ
स्य संख्याऽभावात्कथमुत्पत्तिरत आह· साधनाश्रयेति· यथा तदाश्रये णालब्धसंख्या पातिङ· स्तथा स्वादयोपि स्युरिति भा
वः ननु स्वादीनां तजादीनां च बाध्यबाधकभावो युक्तो इति भावः ननु स्वादीनां तजादीनां च बाध्यबाधकभावो युक्तोत आह। कर्त्रा एम.
दिष्विति· यथा ण्वुल्तृचोः कर्तरि तिङापवादत्वादीनां कर्मतिङापवादत्वं तथा स्वादीनामपि तैः स्यादिति भावः धातोरित्यनुवृत्ता १

(2A)

वृपिवासहृपइतिसवध्यतएवेत्समिमानः सिद्धांताशयमाह निवृत्तमितिअनएवतदधिकारसंबद्धवासरूपविधिरपिनेतिभावः ननु
कर्मादेोविधीयमानाः स्वादयः कर्माद्यभिधायिनस्तिङ्ःतात्कर्मादिरुक्तत्वेननभविष्यंतीत्यत आह कर्मादयइति अंतर्भूतकर्मेति ब
हुव्रीहिः ततः क्रियापदेनकर्मधारयः नन्वेवमेकत्वादिषु विभक्त्यर्थेषु संख्यायाउक्तत्वान्नस्युरत आह। पद्वेति अत्र प इत्रे प्रथमाप
त्तिर्वाध्यावचनग्रहणादिति प्रवृत्तिनिमित्तभूता हि संख्या वचनशब्देनोच्यत इति नायं यत्नः प्रकृतेरिति भावः प्रकारांतरेणाप्य
प्राप्तिमुपपादयति नचेति एकप्रकृत्यर्थक्रियायाः एकपदे प्रत्ययद्वयवाच्येन भिन्नेनसाधनद्वयेन संबंधोन युक्तः शाब्दव्यवहारत
या क्वचिददर्शनादिति भावः॥ भिन्नसाधनाभिधायिनोरिति प्रत्ययनोरिति शेषः एकक्रियापेक्षं एकक्रियायामनेकसाधनान्वयबो
धजननायपेक्षणीयसहायत्वंतयोर्नयुक्तमित्यर्थः न स पुत्रीयतीत्यादावेकस्या इच्छायाः शब्दद्वयवाच्येन कर्मणा कर्त्रा च संबंधोद
ष्टस्तत आह पुत्रीयेति नन्वेवं तिङ एवस्साधने स्यादत्यः स्युरत आह अनभिहितेति अत्रेदं चिंत्यं पचतिपश्येत्यादौ क्रियया अपि
कर्मत्वाद्व्याप्योक्तएवसमाधिर्युक्त इति। न चौत्सर्गिकमेकवचनं युक्तं नकेवला प्रकृतिरिति निषेधेन पत्रकेवलप्रकृतिप्रयोगेन
शासस्तत्र तत्स्ववृत्तावपि अन्यत्र नत्स्ववृत्तौ मानाभावोत प्रकृतित्वं च प्रत्ययविधावुद्देश्यतावच्छेदकावच्छिन्नत्वं एतदधिकारमा
वे हि प्रत्ययांतरानभिहितसंख्याकारकत्वमुद्देश्यतावच्छेदकं न चेदं तदवच्छिन्नमिति नैतद्विषये तन्निषेधप्रवृत्तिः अप्ययेष्यरक्त
अव्ययाद्वा सुपइति तापकात्व ~~क्विषिद्विषुत्सत्तावाद्याप्रिकातातवच्छेदकं नचेदं तदवच्छिन्नमिति नैतद्विषये तन्निषेधप्रवृत्तिः अप्य~~

कै· टी ४ विभक्त्यर्थः अप्रपादानुपरतिश्चापकान्तेः सचिदुत्पन्नावावशिष्यकायामोत्सर्गिकं तदेवं भवति पचतिरूपमित्यादावपि पूर्वोत्तरनडिनानां सु
२ प्रकृतित्वनिर्णयेनास्यापि प्रकृतित्वात्केवलेत्यादिनिषेधप्रवृत्तिः रूपपादानतीमायेकवचनं तत्रानभिधानान्नेतिभावः अन्तए
वसुप्तिङं तमितिसूत्रेतिङ्ग्रहणं चरितार्थं· ननु क्रियायालिंगाभावेन तत्राह यथेति· ननु कारकद्वारासंख्याकार्यवत्तद्वारैव लिंग
कार्यमस्तु तत्राह न चेति द्रं· तोपस्थाप्य क्रियायाः द्रव्यधर्मसंख्यायापरंपरायोगेपि न तया लिंगेन योगः विचित्रत्वाच्छब्दशक्तीना
मितिभावः भिद्यते आरोपितसंख्यावती भवति· तदा अपत्वसंबद्धो लिंगसंख्योभेदस्तत्र नारोप्यते इति शेषः कस्यचिच्छब्दस्य शक्तिः
कस्मिंश्चिदुपस्थिते प्यर्थे प्रतिबध्यत इत्यन्वयः एवं प्रकारः स्वाभाविकत्वाच्छक्तीनामित्याख्यायत इत्यर्थः। अनेन त्वाससांत्साधनग
तसंख्यायाः क्रियायामारोपेणान्वितः अर्थसंख्यायाः प्रकृत्यर्थेन्वान्वयः आरोपमूलेन तया च कर्तुरप्येकत्वप्रतीतिः शब्दशक्तिस्वभावा
त्स्वप्रकृतिक्रमस्य वाच्यसाधनगतायाएव तस्यास्तत्रारोपः तेन भावे न द्विवचनाद्यापाद्यं पदानुतत्र प्रकारांतरेण संख्यावगम
स्तदाभावेपि बहुवचनं भवतीव हन्तशापिकाः शप्यंत इति यथा· तत्र हि उपमानबहुत्वाद्बहुत्वार्थे बहुत्वावगतिः अन्यथा तत्र बहुत्वो
पादानं व्यर्थं स्यात् एतेन क्रियासंख्यायाम योग्यैवेति परास्तं। न चैवं पचतः कल्पमित्यादौ द्विवचनाद्यापत्तिः संख्यायास्तिङोक्तत्वा
त् एकवचनं तु साधुत्वार्थमिति न दोषः तद्यपि प्रथमायाएव तास्सामनभिधानादित्यादि पंचमेव स्यात् अत एव सुबाद्युत्पत्ति एम·
रेकत्वादीनामुक्तत्वाद्वारितानन्तु संख्याभावादित्युक्तं· यदि संख्यायाः स्वप्रकृत्यर्थकर्त्रीदावन्वयस्तदा स्त्रीत्वस्यापि तत्रैव स्या २

दिति वैषम्यं दुरुपपादं किंच पचति पश्य पेसादौ द्वितीयावारणायसंख्याभावादित्येव वक्तुं युक्तं न नूक्तत्वादिति लट्टीसापचतीतिङाक
र्तृगता याउक्तत्वेपि क्रियागतायाअनुक्तेरत एव कर्माद्यभावादितिनो कमित्यधिकं मंजूषायां द्रष्टव्यं॥ ननु क्रिया याइति॰ शब्दशक्ति
स्वभावेनाख्याते या तत्क्रिया या स्तद्योगादितिभावः॥ नपुंसकत्वमिति॰ नपुंसकत्वमेव नान्यलिंगयोगइत्यर्थः॥ सामान्यतो दृष्टेनेति॰
विमतं न लिंगयोगि क्रियात्वात् पश्यापचतीतिवदित्येवं रूपेणानुमानेनेत्यर्थः॥ अनेनैवेति लिंगाभावेनैवेत्यर्थः ननु तिङं॰ तार्थस्यापत्या
दिना कथं योगो तत्राह यथेवेति सर्वनामप्रवृत्तम् एवं यत्तिङं॰ तार्थक्रियाधारस्तेन संबंधसंभवइतिभावः ननु प्रातिपदिकादेवो
त्पत्तौ लुग्विधानं व्यर्थमत आह॥ लुग्विधानेनेति॰ ननु सतो निवृत्तिराख्याफलेअयुक्तत्वादितिभावः॥ तदन्वाख्यानफलं च मत्वप
लक्षणसिद्धिरिति बोध्यं॰ लोकान्युक्तं आमुष्यायणे तादौ नु अलुग्विधानादेव षष्ठी बोध्येत्यभिमानः॥ नन्वेवं तस्यापत्यमित्या
दौ किमर्थं तस्मैर्थविभक्तिनिर्देशो तत्राह॥ तस्येनिति तिअतत्वमतत्वादिति॰ तस्य हि सत्वभूतमर्थं प्रतिशेषणत्वेन दृष्टमिति भा
वः एवंच तेरेति षष्ठ्यर्थ परामृष्टस्यापत्यादियोगस्तत्र घटादेव प्रत्ययइतिभावः॥ अव्यापिकं चेदिति भाष्यमभ्युपगमवादमात्रं के
चित्तु तिङ॰ श्वेतिसोपकनन्तिङ॰ तात्त्वाद्योभवंतीत्येवं सामान्यापि भाष्येणाद्यपरत्वे आदिशब्दः प्रकारवाची साधुः वाक्याप
स्येति कारकान्वितक्रियेवाख्यातेवाक्यार्थइतिभावः शक्तिः कारकं त्यायस्योक्तत्वादिति॰ नच तिङ॰ तस्यस्त्रीत्वेन योगोस्तीत्यनेनेति
त्यर्थः॥ तदेवं स्वादिविधौ प्रलत्वंतरासंभवात् यारिशेष्येणाप्रातिपदिकत्वसोवेप्रलक्षितिरिति स्थितं॰ ननु तेषामेव कास्येयेतव

(5)

कै० टी० ४ एवस्मादयइतिअंगत्वादिकमपितेषांसिद्धमतआहशब्देनेतिभाष्यकारइति॰ ननुवार्त्तिककृत॰ तेनोत्तरवार्त्तिकेचकारकरणात्‌इतिभा

३ वः वस्तुतउत्तरवार्त्तिकेच शब्दो वार्त्तिककृतापितदर्थएव प्रयुक्तः इदि स्थितपा॥ इच्छाच वार्त्तिके फलांतरकथनं तामहविंभा

ष्यकारः स्फुटयती सेवं व्याख्यानमुचितमेवमन्यत्रापिबोध्यं उपादानमिति॰ ननुसाक्षादुच्चारणमितिभावः॥ संतति॰ येनविधिरि

त्यनेनेतिभावः नन्वेतदधिकाराभावेविशेष्यसंनिधानाल्लभ्येतदंतविधिरमआहअत्रेति॰ एतदधिकारेणेत्यर्थः दर्शयतीति॰ प॰

सामर्थ्याद्विभक्त्योपादानंनाभ्युपगच्छतीतिंप्रतिकृत्रिनरभ्युपगमाद्वर्णकत्वमेकदेशीदर्शयतीत्यर्थः॥ परमार्थतस्तत्रापि

ग्रहणमस्तीत्याहअर्थ्यतिति॰ नन्वपरस्मैपदेननुप्रकृतिरितिनिपत्तछ्वद्रूपमित्यादिभाष्यमनुपपन्नमतआहपरार्थेतितद्धितव

त्तौपरस्यप्रत्ययस्यार्थेप्रकृतिरभिधत्तेनत्वितनस्वार्थेप्रतिपादयतीत्याशयेनेत्यादित्यर्थः यच्छब्दरूपंस्वपत्यादिस्वेर्थेप्रवर्त्त

तेतदन्वय्यर्थप्रतिपादकमित्यर्थः इत्यन्येननुपावदितिनपुंसकस्यपुंकृद्‌इत्यनेनसामानाधिकरण्यमयुक्तमतआहयावत्तावदि

ति॰ ननुतद्धितांताविदर्थः ननुसंख्यावाचकैः स्वादिविधीनामेकवाक्यत्वाद्भ्यमारणीत्यानदोषोत आहप्रकरणेति॰ त्रिके॰ स्वार्थ

द्व्यलिंगरूपे[redacted]दिपुच)॰ चतुष्केपीतिस्वार्थद्रव्यलिंगकारकरूपेत्यर्थः॥ चतुष्केचेति॥ स्वार्थद्रव्यलिंगसंख्यारूपेत्रचतुष्कश एम०

ब्दार्थः ननुवाचकत्वप्रयोजकत्वच्छब्दरूपमेकत्वादिषुवर्त्ततइतिभाष्यमनुपपन्नमतआहवाचकपदितिति॰ घीनकस्वपक्षेरावनुभा ३

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

ष्यस्वरस्तः अत एव तस्याः विशेषणत्वमेवेति बोध्यं· अंगानां हीति· एकसंनियोगपाठे हि तदन्वय एव स्यादिति भावः एवं च यस्मात्प्रत्ययवि
धिरित्यत्र विधिग्रहणात् प्रत्ययविधौ शब्देनार्पितो वावधिलपाश्रयणांतस्यांगादिसंज्ञा सिध्यतीति अंगादिसंज्ञार्थं सूत्रं न कार्यमि
तिस्पिते फलांतरमाशंकते पञ्चयोश्चेति ननु प्रत्ययस्य लुगिति वचनात्कथं प्रलुतेर्जुगपादनमत आह पञ्चयोरिति· ननु क्रमेः
सहस्रादिव्युत्पादनादव्युत्पन्नानीत्युक्तमत आह अनन्तेति· कसंख्यानकंसोनभिधानादिति भावः। ननु पञ्चजोरेव लुक्स्यादत
आह। पञ्चजोस्त्विति· औत्सर्गिकाण एव लुका सिद्धे तद्विधानं व्यर्थं स्यादिति भावः। विकल्पस्त्विष्टदोषदुष्ट इति ध्येयं अप मुख्य
फलमाह हस्त्यादि। नन्वसाधारणधर्मो लक्षणं न चेदं द्व्यादिः प्रत्ययस्यासाधारणो धर्मोऽत आह वक्ष्यादय इति वक्ष्यादीनीति· तस्य
ख्याख्याति पदिकस्य वक्ष्यादिविशेष्यत्वेन संप्रत्ययोपपत्त्यास्यादिति वार्त्तिकार्थ इति भावः प्रत्ययार्थेति· भाष्ये कस्येतानीति किं श
ब्दः त्वे पेनान्यस्य कस्यापि किं तर्हि ख्यापमानि पदिकस्येवेत्यर्थ इति भावः।। अधिकारादिति परसमर्थः पदविधिरित्येतदधिकारादि
ति वक्तुं युक्तं। कृतविशेष्यसंभवेन कल्पनावकाश इति भावः नन्वेतदधिकारेपि संनिहितत्वाविशेषात्समर्थविशेषणमेव
स्तु अत आह तदुपादानसामर्थ्यादिति· प्रागुक्तप्रयोजनाभावात्तु भगवतारवंडितानमेवेति भावः वक्ष्यादीनीति आदिना समर्थानां प्रथ
मादित्यपि· अन्यथा कृतवर्णानुपूर्वीकत्वसामर्थ्यस्य सुवंतविशेषणत्वे मानोरथसंभावनं चरे त्यत्र ओकारसहितस्य टुकानि
वृत्तौ त— पा सिद्धिः स्यादिति बोध्यं· ननु आश्रगुतापनिरित्यादो चरितार्थः पिच्छकपंचहुत्वंगमपेदत आह। प्रकरणादिवशाद्दे

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)

पा·३ आ·२

कै·टी·४ भेदः पृ पगुपस्थितिः संख्याविशेषोद्दित्वादिर्व्याख्यातः वृत्तावत्तत्वेन वाक्ये तत्वेनेत्यर्थः विशेषस्त्विति संख्याविशेषास्त्वित्यर्थः प्रत्याहृशः
४ असत्वविशिष्टः शेषोर्षिके मासजाततावकीना दोव्यभिचारातइतिभावः वस्तुतोवस्तोद्दित्वादीनामभानमेव· प्रकृत्यर्थतावच्छेदक
रूपेणानेकव्यक्तिभानं तत्रतद्बोधनायेद्वाक्यं प्रदर्श्यते नत्वेषविग्रहइति वोध्यं मपटेति· नित्यं वृद्धेत्सनेन केचित्तु नित्यं वृद्धेत्यत्र भाषाया
मित्यनुवर्त्तेर्भाष्यच्छंदो भिन्नापमित्याहुः सर्वस्यसुपीति· सोचरस्य प्रमीनांतदंतस्य प्रमीत्वेन प्रत्ययेपरः तपूर्वकार्यत्वाभावेन नत्वुम
तेसस्याश्रनोप्रत्ययलक्षणेन सुवंतत्ववोध्यं। अंतरंगानपीति स्यापोप्यंतरंगनिमित्तविना शक्त्यै वलुको वल्नवत्वबोधकः अस
तव्रह परिभाषाभाष्यकृताः स्वीकाराच्च सुपग्रहणफलं तत्रप्येतदेव नरभावेहि सर्वत्रानेनाद्युदात्तत्वेन दात्तादित्वाभावाद्गननाप
त्तिरिति वोध्यं ननु शिट्स्वरेण सर्वशब्द आद्युदात्तएवेति किं सर्वस्य सुपीत्यनेनेत्यतआह· सर्वशब्दइति· अतएव वत्तिरूपांतेसार्व
इत्यजंतप्रयोगसिद्धिः। वार्त्तपुरुकमिति। वार्त्तशब्दो पुरुकप यो सार्वपर्यायश्च। भाष्ये क्रुड् ग्रहणे चेति श्वभूशब्दे श्वशरः श्व
श्वेति निर्देशाद्रक्ष्ये नएवायमव्ययत्वमिति भावः। अरिंतत्वे मादि[illegible] व्यर्थइत्यतआह। अनादिष्विति· हलंतादेवेति· एवकारो भि
न्नक्रमः। हलंताद्धिहि तस्यापएवेत्यर्थः। नन्वविशेषे कांतादित्यमिति सोप्यस्तीति नतआपि अंतवद्भावेन सिद्धमतआह देवविद्रश
ब्दादेवामिति· एवंचाव्यवहृतादंतत्वे मानाभावेन नाकारांतादाएवकुशक्त्वइतिभावः देवविद्रशब्दादेवामितिपाठे प्युक्तएवा एम·
र्थः। भाष्येतस्मात्कृएषइति· कृप्रत्ययांतोदंतएव एवंविषयोत्वादिप्रयोगविषयोनहलंतइत्यर्थः अनेनैतिप्रसंगोकारितः एतेन ४·

Sanshodhan Mandal, Dhule ... Pratishthan, Mumbai

(5A)

हलंतेऽन्त्योर्मपरावृत्तिभागुरिमतं वित्वमिति सूचितं। भविष्यतीत्यस्य दिक्। मित्याकांक्षायामाह। अप्राप्तिपरिकल्पेपीति। भाष्ये पदशब्द इति
छंदसि दृष्टस्य लोकेपि कृचित्प्रयोगांगीकारं बाधकाभावेनाकारांतादेव प्रत्ययः एवं च टाबृचीति सूत्रं न कार्यमिति भावः एवं च ऋ
चिवाच्यायामपि एकपद्या एकपादित्यस्य भाष्यरीत्या सत्वेन टाबृचीति सूत्रारंभेपि तत्रान्यतरस्यांग्रहणानुवृत्त्या तत्साध्यमिति सूचितं
भाष्ये वदुः राजेतीतिवाचादिशानिशादेरप्युपलक्षणमिदं स्वरूपग्रहणं एवेति विशिष्यग्रहणं एवेत्से ऽविशेषाभावमात्रेण वि
वच्छिन्नमित्याह ऊङ्घीति। भाष्ये पुंवद्भावेनैतस्ति इष्यति भस्याढे तद्धिते सिद्ध्यत्रस्य पविधावित्युक्तेरिति भावः। अप्रयोजनमि
ति। तदनित्यत्वाश्रयेण भाष्यं चिंत्यम्। परिभाषायाः प्रातिपदिकग्रहणे चाप्यपशुमर्षोल्लिङ्गविशिष्टेति देशाद्यस्यार्थ इति बहुव्रीहे
रुपस इति सूत्रभाष्ये व्यक्तीभविष्यति एवं च समासोत्तरमपि अंतरंगत्वात् लुक् पूर्वं ङीपि तेन न्यायेनोत्तरपदत्वस्य नष्टत्वात् शिष्टे ए
वसत्वेन लुगलुगादिनस्यादिति स्यात् तदर्थमावश्यकीयमाशयं एतदपि भाष्यं तत्र मानमित्यन्येपरः परिभाषास्वीकारे दोषानुम्रा
वपत्तिः अतिप्रसंगः स्यादित्यपवादत्वात् घसंभवाद्दाहपरत्वादिति। ठकीवकाशो दात्तेय इति रंकारेऽलुतर इति। तस्याभीयत्वेनासिद्ध
त्वान्नेति। टिलोपाभावे ऽनौ मीनइत्यकारलोपप्रसंगेति लोपेच सतीत्यर्थः। भाष्ये पुंवद्भावश्च लोपश्चेति। भस्याढे इति पुंवत्त्वे
न तद्धित इति टिलोप इत्यर्थः महाजं घ इति महति महतीजघापस्येति समासेस्त्रियाः इति पुंवत्त्वे आत्वं भवत्येवेत्यर्थः इष्यत इ
ति आधुदात्तत्वं नुपदं प्राप्नोतीत्यर्थः। अत्रपक्षे पूर्वोत्तरपदरूपसमाससंघातग्रहणात्पात्सूत्रार्थः आजेनदर्शपतिवद्धिति। बह्वी

कै॰ टी॰ ४ गोमत्योपस्याइतिविग्रहे एनत्स्य वृत्तेरिष्टत्वाद्धह्रबहुवो गोमनोस्याइति॰ ईकारान्तबद्दिति॰ ततः पूर्वो मिशब्दाकारो वहोरितिसूत्रे लोपात्तर
५ त्पर्थः उगिदचामित्यत्रेति पुंवोरनाकावितिसूत्रेनतत्रमपिगृहीतात्स्यार्थस्योकत्वादितिवोध्यं दोघो म्हा वपिताहए नेदोषाइतिम
इकारस्त्यर्थः एतानिचू॰ त्वदुक्तानिसमाधूयोसो वेतिअन्येषांमपिदोषाणांसत्वादिस्मभिमानः परिभाषाकषाह नहिदोषाइत्यादि
आरंभेपुवत्तं तरमाहदोषाः स्वल्पपीतिअस्मत्रदोषामावादितिभावः ननुध्याएग्रहणोहृतेपिप्रातिपदिकत्वमांश्रित्यपरत्वात
द्धितः स्यादतआह सतीतिप्रकृतित्रयाधिकारत्वाम थ्यदितिपाठः वा घप्रतियोग्यपेक्षत्वादिति॰ तदये भ्रत्रकर्षा घन्यपष्ठ्स्वा
र्थेसमाप्तस्येवेति।नितरवादिर्वा।हिरंगइतिभावः स्वार्थमितिस्वार्थेत्रप्रवृत्तिनिमित्तसमवेतं॰ तेनस्वार्थेनाश्रिनमित्पर्थः विभ
क्ति॰ कारकं॰ पतः कृत्स्नमात्मानमपेक्षमाणः पूर्वंतद्विपयकां भावानंतः ततः श्रियादिपुप्रवर्त्ततइत्यन्वयः युगपदर्थाइति
शब्दबुद्धिकर्मणांविरम्यव्यापारायोगादितिभावः ननुशा[illegible]कल्पितां कल्पितन्यायवशाद्दलोपितक्रमवतीं अर्थवत्ता मिश्रित्य
तिनात्पर्यंहातदाश्रयणेतुसत्तं तरंगत्वादेव पूर्वस्त्रीप्रमयपेक्ष्यर्थमिवचापृग्रहणमितिभावः।भाष्येतत्रसमासांतेषुदोषइत्यतः पूर्वं
तत्रकोदोषइतिवार्त्तिकापपाठः प्रभसानन्वप्रातबहुपवमन्केसुतरंनासत्र्यर्थः तत्रअ्यापग्रहणोव्यासमासांतेषुदोषइतितद
र्थः ननुहृस्वदीर्घयोर्विशेषाभावात्स्यत्रेत्यनुपपन्नमतआह केणातीति॰ मनुपुंवतितरेत्यत्रतसिलादिष्विति पुंवत्वं दुर्वारमतआ एम॰
हज्ञातेश्वेतीति॰ एषांतातिकार्यस्यवैकल्पिकतायाअग्रेवक्ष्यमाणत्वाच्चाचः परस्मिन्निति सूत्रस्यपुवज्ञानिरिभिभाष्यप्रयोग ५

(6A)

संगतिः। विकल्पेनेति। एवं च नरभावेदीर्घश्रवणापर्यमूढ। ताब्रहित्तितोवश्यमंगीकार्यइतिभावः। माष्येदोषांतरमाह। तदंतस्य चेति
तस्य स्वर्वत्रेति। प्रत्ययार्थत्वात्स्वार्थीयंस्त्रीत्वंप्रधानमितिभावः। सर्वस्येवेतिभेदहेतुगुणादिकंविनानद्रव्यस्यस्वतः प्रकर्षोनापिभेद
हेतुंविनासद्रव्यरूपः प्रधानोर्थः शब्दाभिधेयइत्यर्थः एवंचनिरुपाधेर्व्यपदेशाभावाद्यदुपाधिकृतोव्यपदेशस्तन्निमित्तएवप्रक
र्षः उपाधिरपियत्रप्रकर्षादिहोतस्तत्रतत्सहचरितगुणप्रकर्षोबोध्यः यथागोतइत्यादौ एवंगुणादिरेवयत्रप्रधानंतत्रतस्यद्रव्या
श्रमाणत्वात्तत्तत्संसर्गिधर्मांतरनिमित्तएवप्रकर्षः यथाशुक्लतरंरूपंअतिशयेनशुक्लमित्यर्थइत्यादिबोध्यं। स्त्रीत्ववतिद्वयोर
तिनेनेति। विप्रतिषेधोपपत्तिरिति॥ अर्थकृतत्वबहिरंगत्वानाश्रमणात्स्त्रीप्रत्ययानांनहिरंगत्वमितिभावः यदिकविशेषण
त्वादित्यस्यतदर्थविशेषणत्वादित्यर्थइतिभावः स्वार्थेदाप्यभिप्रकृतेकिमायातमतआह नतथेति। गुणप्रकर्षाश्रयेति। गु
णप्रकर्षकृतेत्यर्थः गुणगतप्रकर्षस्यद्रव्येआरोपइतिभावः अंतरंगेबहिरंगत्वेपिआधोद्यो योत्वेनेत्याहवनुचोक्तमितिभाष्येक
पंकालिकेत्यत्रिमभाष्यानुत्थानायुत्तेराह॥ प्रत्याख्यास्यतिननुपूर्वोक्तकालितरेत्यादिस्त्वकाकपंकालिकेत्युदाहरणंतरदा
नेबीजमाह। कालितेरत्वादोलिति। पूर्वोक्तेनस्वार्थमभिधायेत्यादिनाअसत्वंतस्वार्थिकतरयोऽभावादितिभावः ननुकालिके
त्यादावपितेनैवन्यायेनांतरंगत्वात्तस्त्रीप्रत्ययः स्यादतआह वर्णाच्चेति। स्वार्थः केवलस्वार्थे असत्वंतस्वार्थिकत्वात्तेषांतत्रचन
तत्त्वापावस्तरइतिभावः हरितशब्दात्सरत्वात्कनिति। ततश्चवर्णादनुदात्तादितिङीपप्रकारेणस्यातामितिभावः अत्तातादिक

कै॰ टी॰ ६

स्पत्तिविति पादः कन इति पाठे संज्ञायां कनिति बोध्यं ननु वचनांतरस्वीकारेणावचनप्रत्याख्यानमयुक्तमत आह अवश्येति लोहितात्कना प्
रत्वेन प्राप्तं लिंगबोधकप्रत्ययबाधनं चेति तदर्थः प्रतिपदेति· अनवकाशत्वे सत्येव तत्स्य बाधकत्वप्रयोजकत्वाच्चिंत्यमिदं पुरत्वा
दिति वक्तुमुचितं एनिकाएनिकेत्यादि तु असंतत्वार्थिके कनि न भवत्येव· वचनाभावात् एनशब्दस्य प्रकृत्यंतरस्याभावाच्च किं त्वेनि
केत्येव सूत्रमतेपि ध्याप्ययहणमसंतत्वार्थिकानारम्भ्यानिवृत्तमेव अश्चार्थे लोहितादिति वचनमेव ज्ञापकं सूत्रे ध्याप्ययहणं
तकालितरेत्यादावुक्तन्यायसिद्धार्थकथनमेवेति न सूत्रभाष्ययोर्विरोधः वचनाभावात् एनशब्दस्य प्रकृत्यंतरस्याभावाच्च किं
त्वेनिकेत्येव सूत्रमतेपि ध्याप्ययहणमसंतत्वार्थिकानारभ्यानिवृत्तमेव अश्चार्थे लोहितादिति वचनमेव ज्ञापकं सूत्रे ध्याप्
यहणं तकालितरेत्यादावुक्तन्यायसिद्धार्थकथनमेवेति न सूत्रभाष्ययोर्विरोधः न च हरिरणीकेत्यादौ कनि कृतेपि पूर्वभागे वर्णा
दनुदात्तादिति ङीप् दुर्वारः· एकाचूर्द्धिर्वचनन्यायेन समुदायात्स्त्रीप्रत्यये तेनैवोक्तत्वात्पामध्येन ङीनुत्पत्तेरित्याहुः ङीपां शास्त्रप्रसिद्धे
रभावेपि लोकप्रसिद्धार्थानुवादो भविष्यतीत्यत आह लोके चेति खट्वादिष्वव्याप्तिः मुकुंसादिष्वतिव्याप्तिरित्यर्थः ननु यद्यपि लौ
किकस्त्रीव्यक्तियहणे दोषस्तथापि जातिस्तपरस्परबद्धादिसाधारणेस्य मुकुंसादिव्यावृत्तस्य यहणमस्त्वित्यत आह नैवेति·
सामान्यविशेषरूपत्वं जातिविशेषरूपं त्वमित्यर्थः भिन्नत्वादिति एतेनाकृतियहणेनैतत्स्त्रीलिंगत्वं न स्त्रीत्वस्येत्युक्तं· जस्त रणं०
णांतरमपि नास्तीत्याह न चेति लोके विभक्त्यनुसारेणोव प्रयोगे कर्तव्ये किमित्यत्र पाप्नोत आह यत्र वस्त्विति· विशेषविषय ६

(7A)

तिस्त्वो विशेषविषयइत्यर्थः। पंचम्यंतादिति आद्ये लोकशब्देन व्यवहारज्ञं अंत्ये व्यवहर्त्तार इति भेदः। लोक्यते येन शब्दार्थो लोकस्तेन स्वउ
च्यते॥ व्यवहारोपवाचवृद्धव्यवहर्तत्परंपरेत्युक्तेः। नन्वर्थे पदे शब्दप्रसिद्ध्यभिधानं व्यधिकरणमत आह विशिष्टेति· प्रसंगेनेति·
न तु तत्स्वरूपमिति भावः। दर्शनावसाययोरेकत्वादाह यन्निमित्तमिति यन्निमित्तमुपलभ्य एतन्निमित्तवदर्थरूपं स्त्र्यादिशब्देनोव
सीयतेऽप्यपतेइत्यत्रार्थः भाष्येवसायाकारमाहरूपं स्त्रीत्वादि ननु स्त्रीत्वावसायस्य पंस्त्रीत्वाकारोनुपपन्नो तत आह तद्योगाच्चेति·
शुक्लादिशब्दवदिति भावः। स्त्रीत्वादेस्तनादीनाविधेपलिंग आहितयानानुपपत्तिरन्यथा तत्स्त्रीत्वादिवक्तव्यं स्यात्। स्तनादेरि
ति· आदिना संख्या कर्मत्वादि· लिंगनित्यस्यानुमितिजनकमिति नार्थद्याहतेनेति। ननु स्तनादिसंबंधस्यान्यत्रापि दर्शना
दाहभूमादाविति· आदिनातिशयः लिंगप्रतिपत्तिपूर्वकमिति· पूर्वकमिति स्वार्थिकस्ततः षष्ठीसमासः तज्जनकमित्यर्थः
लिंगप्रतिपत्तिपरमिति पाठेतत्प्रतीतितात्पर्यकमित्यर्थः ननु कुनामातिशापितस्तनाद्यभावात्क पंस्त्रीत्वमत आह अन्यस्यापी
तियोन्यादेरित्यर्थः। ननु स्तनादीनामननुगतत्वात्तन्निमित्तानुगतप्रत्ययप्रयोगयोगो तत आह अनेनेति· जातिविशेषरूपं स्त्री
त्वादिकं तत्राकृतिग्रहणात्वं दर्शयति स्तनाद्युपव्यंजनानामिति बहुव्रीहिः समन्वयः अनुगमः। द्रव्यादीनि आदिना गुणग
क्रियाजातीनां संग्रहः। स्तनादीत्यादिपदेन शब्दगतमवाच्यपि शब्दार्थयोरभेदाच्छब्दनद्व्यर्थगतस्त्रीत्वादिव्यंजकं बोध्यं।
स्तनादीनां व्यंजकत्वादेव भाष्ये यतदृष्ट्वा एतदवसीयत इत्युक्तं तत्र हि स्वरसतो यच्छब्दे तच्छब्दार्थभेदः प्रतीयते। अंतरशब्दः स

(8) 

कै॰ टी॰ ४ दृशवाचीत्याह स्त्रिलिंगेति अनेन तादृश्यहेतुरुक्तः तेनेति लिंगवतया तादृश्याय हरणेनेत्यर्थः। अव्ययार्थानां असत्वभूतत्वान्न लिंगयोग इ

७ ति भावः तदुक्तं वेइसुच्यमाने अव्ययानामपि न पुंसकत्वं स्यादितितात्पर्यं तदभावे इति स्त्रीपुंस्त्वाभावे इत्यर्थः प्रतिपत्तिगौरवमिति।

सामान्यकानां स्त्रीवेषधारीति भावः नित्ययोगे मतुपि दोषतरमाह। केशवपने चेति ननु स्तनादिशयस्योगादेव न च स्त्रीत्वमन

न्याह स्तनेति॰ बालायाः केशवपने तत्संबंधोपि नास्तीत्यर्थः ननु स्तनकेशग्रहणमस्यस्ययोग्यादेरुपलक्षणमिति सुक्तमतो न दोष इत्य

त आह स्यादीति॰ खट्वाहावित्यर्थः। दारादिष्विति व्यापकत्वमपि बोध्यं॰ इति केचिदाहुरिति तत्स्य लोमशत्वेन पुंस्त्वान्न लापत्तिरिति

तदाशयः चवेत्यादि साधारणेषम प्रकारान्तरमाह तत्रेवापद्युति मनुष्याणि इति॰ यद्यपि मनुष्यशब्दः स्त्रीपुंससाधारणस्तथापि पु

रुषसंततायाम संप्रसंगेवोध्यः नपुंसक शब्दाभ्रा वेऽ लेदुर्लभत्वादाह नपुंसक इति लिंगवतेनेन स्त्रीपुंसस दृशत्वादिसत्वया लिंग

वत्वे हेतुमाह सत्वेति सत्वरूपत्वंक पुंलिंगवत्वे हेतुमाह सत्वेति सत्वरूपत्वंक पुंलिंगवत्वे साधकमन आह लिंगेत्यादि दृष्टादव्या

प्तिवारणायाह भाष्ये। सन्निति तत्राविद्यमानमित्यर्थः कुड्ये तु सदिति भावः तदुक्तं विप्रपृष्ठ्यादि चित्तस्थं न बहिष्ठं कदाचन॰ स्वप्र

श्रममदायेषु सर्वैरवानुभूयत इति अत्र न कदाचनेत्युक्त्या तर्वः प्रयचो वहिरसत्त्वे वेति सूचयति॰ प्रपंचितं चैतदस्माभिः परमार्थ

सारो घोतेतत्र हेव मुक्तं भगवनाशेषेण॰ मृगमृत्याया मुदकशुक्तौरजं भुजंगमोरज्वा तैमिरिकचंद्रयुगवत्सांनमरिवसत् ज राम॰

गद्रूपमिति॰ अमेच वहिरसतर एवमानमित्यत्रोक्तं ननु मृगतृष्णा न स्वरूपेणासती नाप्यन्यरूपेण तत्प्रतिभासोपतः प्रति ७

(8A)

मासमानाम्यरूपेणासत्त्वंस्यादतआह मृगेतिपिपासापर्याप्तस्याशब्देनतत्कृतभावनावशात् उदकत्वेनप्रतिभासमानामरुमरी
चिकोच्यतइतिभावः मरुमरीचिकाशब्देनरविकिरणानुर्ध्वाधरभावेनभ्रमआक्रामंतस्तरंगाकारप्रतीतिजनकाउच्यंतेतत्रएषाम
गास्तृषिताइतिभावःप्रेमृगाइत्युपलक्षणंस्यपतइति· पुमोपासनतोद्भवरइतिभावः इदं चं वैशेषिकादिमतानुसारेणअन्नस्मर
णाभावंदर्शयतिनहीति· अनुभवः सदृशवस्त्वंतरयदर्शनादि संस्कारोद्बोधकस्मृतिहेतुरितिभावः अदृष्टवशादपिसंस्कारोद्बो
धेनानादौसंसारेतेषामपिदर्शनेनचतत्रापिस्मरणासंभवाच्चित्संमेततत्पानंजलैः पूर्वानुभूततारूपतत्तायाः प्रमोषानंगीका
रात्तजलमात्रस्मरणासंभवः किंचजलस्यस्मरणेपितस्यतद्देशस्थत्वमसदेवभासतइतिभावाशयः अचिंत्येति· अनाद्यविद्या
रूपमिथ्यावासनावशादित्यर्थः अदृष्टविशेषवशादित्यर्थः समे· मरुतस्यासुतद्विषयमरुमरीचिकासुसलिलनिर्भासस्य
समेवविवृणोति· वुद्धिरित्यादि· असतिजलेतद्बुद्धिरित्यर्थः वीजानिमिथ्यावासनादिअव्यपदेश्येभ्यः अचिंत्येभ्यः हेतुभ्यः मिथ्या
वासनाऽदृष्टरूपेभ्यः कारणेभ्यइत्यर्थः नारकादिषु। तारकापुष्पाः नभस्त्रमित्यादिषु अचेतनेषु· मुख्येभ्यः कुमारीत्यादिषु वंहि
विधमानेभ्यः स्तनकेशादिभ्योहेतुभ्यस्तद्धेतुकव्यवहारश्चअसल्लिंगहेतुकोपिभेदोभेदव्यवहारइत्यर्थः। शब्देनतस्यकृत्वानमिथ्या
तानाभ्यामावेदितस्यार्थस्याविशेषेणाभिधानात्चेतनेषुदेवदत्तादिषुचअचेतनेषुनारकापुष्पनक्षत्रादिषुलिंगप्रतीतिरविरु
द्धेतिभावः। प्रतीतिमात्रेणैवचशास्त्रीयकार्यमिव्यवहारइतितासपंनिराकरोतीतिमृगतस्यादिदृष्टांतेनासतोपिलिंगस्यरवद्यादे

कै॰ टी॰ ४
८

मिथ्याज्ञानात्मकस्यास्यऽविषयतामुक्त्वा तस्यैव शब्दबोध्यतोक्ता तत्रासतउपलंभे शशविषाणादेरप्युपलब्ध्यापत्तिरित्याशयेनास
त्त्वं निराकरिष्यन्प्रकारांतरमाहेत्यर्थः तत्र तन्निराकरणं तमोरूक्तत्वं दृष्टेत्यादिनाव्यक्तनिक्रियायस्य सत्त्वादिमत्तयाधारणया
दित्यगतिरिष्टं तत्त्वेनोक्ता भाष्ये तत्कृतं कार्यं दावादि किं विदग्धीति उक्तं तोगंधादिवदित्यर्थः। व्यंजनतात्वीतादि व्यंजकत्वं तनके शादिभ्र
निर्वचनीयवादेनापि न निर्वाहः अनिर्वचनीयस्याप्युपलब्धिर्दर्शनात् किंचन निर्वचनीयस्य ख्यातिस्तद्भावादिति संख्यासूत्रेण
तन्निरासात्॥ तस्य लोके ह्यप्यदर्शनादित्यर्थः अतएवात्र भाष्ये सत्तु सगतत्वरणावदित्येवोक्तं न त्वनिर्वचनीयमित्युक्तं॥ किंच स
त्मेदसत्त्वमेसङ्केदेचसत्त्वमित्युभयरूपतापत्तिनत्वातिरिक्तत्वं॥ तत्र सत्त्वमधिष्ठानगतमारोपितं यावद्धिशेषदर्शनमसत्त्वं वास्तवं॥
अतएव परमार्थसारे भगवतासंस्मामि वजगदसत्स्वरूपं प्रकृतेरिदं कृतं येनेत्यादिनोक्तं तत्र सत्त्वमधिष्ठानब्रह्मगतमारोपितमि
तिसत्समिवेसनेनत्यपेवोक्तं एतच्च परमार्थसारव्याख्याने स्पष्टमिति व्या॥ शशविषाणादिवदिति॥ अन्यपतिषामपि सत्त्वं स्या
दितिभावः दृश्यानुपलब्धिं॥ दर्शनयोग्यानुपलब्धिं शशस्य कमित्यपेक्षः अरोइति लोके प्रसिद्धमित्याहुः॥ भाष्ये केनेतदिति॥ यतो
नोपलभंतेतः इदं केनमानेनन निर्णीतं स्यादिति॥ एवं च सत्त्वे मानाभावात्तदसत एवोपलंभेइत्यंगीकार्य किंच यदि सत्तदानुप
लंभे किंकारणमिति भावः॥ अंधकारेति॥ आलौकस्य सहकारित्वादिति भावः॥ अंशो॥ गत्तेइंद्रियाणां दौर्बल्यं ग्राहकशक्तिहीं एम॰
ननासाचस्वगततिमिरादिदोषोरावरकगतसौक्ष्म्यदोषेण गतद्वाधारकालगतसौक्ष्म्यदोषेण च विषयांतरेति॥ मनः समाधिरपि ८

तत्सहकारित्वादिभावः। ननु प्रकृतेनुपलब्धिकारणतो भूम्यस्यानुच्छेदेखान्मनतेसन आह। सौक्ष्म्येत्येतितदुपपादयति दिमवच्छुरितियो
गसामर्थ्येनेति भावः। एवं चास्मदादीनामिंद्रियशक्त्यभावेन सूक्ष्मार्थसूक्ष्मकालावच्छिन्नार्थग्रहणायोग्यत्वमिति भावः। पपि
सर्वदर्शनशक्तिमत्त्वमिंद्रियं तत्पाप्यस्मदादीनामिंद्रियस्य बहुशः शक्यपरत्वमसावत्वा इति न देशकालस्वभावविप्रकृष्टानां प्रत्य
योगाभ्यासेन च तत्तदपनयेत्संसैः संनिकर्षैः संयोगादिभिरेव सर्वप्रत्यक्षं योगजधर्मस्य पृथक्प्रत्यासत्तित्वकल्पनस्य गुरुत्वादितिना
स्यर्थः। भाष्येऽतोत्रेति। अतः उक्तषट्कादित्यर्थः। सत्तासत्तां चेति। सत्तां विप्रकर्षादिनाऽसत्तामसत्वेन। अनुपलंभोऽनाप्रसक्तं। एवं
वरवह्न्यादिषु लिंगस्य सत्त्वसंदेहे एव न सत्त्वनिश्चय इत्यर्थः। लिंगानुमानमिति स्त्रीत्वसत्तानुमानमेव जायते न तु तद्धृ वहानमपिक
दाचिद्व्यवहारपर्यंतं मृगतृष्णाजलादेस्तत्तत्कालं बाधनिश्चयोऽतो न तद्द्वारोपरमस्तत्तो भानमत्रेत्यर्थः। नन्वव्याप्यत्वात्कथं गग
नेनस्योत्तिरनुमानमतत आह। आकाशादिरिति न नेन कस्याप्यविनाशपरकारणोनित्य अनेन दृष्टविषयानुमानायोगोऽत्र दर्शितः। अपास्ति
यांटाविति शब्दनत्तयोः कार्यकारणभावग्रहात्कार्यं कारणपूर्वमिति सामान्यव्याप्त्या च टाबादिना कार्येण तत्कारणलिंगानुमा
नं स्यात्तत्रेतरेतराश्रय आह तत्र हीति। एतद्धीति लिंगकार्यदर्शनेन लिंगानुमानमित्यर्थः तावल्लिंगकार्येण लिंगसत्तानुमानं
लिंगसत्ताज्ञानेन च तत्साधुत्वज्ञानमित्यन्योन्याश्रय इति भावः। लिंगस्वरूपविविक्तेति। लिंगस्वरूपाविविक्तेति। लिंगस्वरूपेण
विविक्तं रहितं पतत्त्वहृद्दित प्रत्यक्षत्वेरणोऽस्य र्थः। एवं च प्रत्यक्षबाधितमनुमानमिति भावः। लिंद्रियदोषेऽव्यादनुपलब्धिरित्युक्तं

कै॰टी॰४ तन्नाहऐंद्रियेति॰ अस्यथाशशविषाणादावप्येवंस्यादितिभावः प्रमाणांतरावसितेनेतिप्रत्यक्षमानांतरेतिस्थितेत्यर्थः भाष्येस्वेंद्रियविरोधः।
९ स्वेंद्रियजन्यप्रत्यक्षविरोधः अनुमानेनचस्वेंद्रियजप्रत्यक्षविरोधिनानभवितव्यमित्यर्थः अनयोः प्रत्यक्षानुमानयोरनुमानस्यानन्य
थासिद्धरूपबलवत्वाभावेनप्रत्यक्षेणबाधएवोचितइतितात्पर्यं कार्येणलिंगानुमानेदोषांतरमाह भाष्येनदृष्टेचेतिननुनदृष्टमादि
लिंगानिनोपलभ्यंतेतआह लिंगशब्देनेति॰ भाष्यसामान्यतोदृष्टेति ननुतत्रसर्वलिंगानुमानमस्तुतआह कस्मिंश्चिदितिस
र्वलिंगासंभवइति॰ लौकिकसर्वलिंगासंभवइत्यर्थः तेषांपरस्परविरोधेनविरुद्धविषयावस्थानादितिभावः भाष्येतस्मादितिल
ङ्गंनोपलभ्यतइतिवक्ष्यमाणकंप्रत्यक्षाविरोधातन्नादिषुविरोधाच्च॰ नाप्यसदुपलभ्यतइत्यपि॰ सत्त्वेनप्रतीतिविरोधात्कदाचि
दपिबाधाननुभवाच्च॰ अनुमानेनसत्त्वनिश्चयाच्चतथावाचेतनेआमिदीरादिष्वपिव्याप्तिश्चयनस्तस्मादित्यर्थः संख्यमनावश्यंभेनाहस्व
रूपतातइतिएतेनसांख्यशास्त्रानुसारित्वंव्याकरणस्येतिसूचयतिहृदिपरिहारेणेति॰ लोकेन्यः तंत्रेचस्मादिशब्दास्तनकेशादिमस्तुह
पंअपिअस्यछात्रेयोगेनतैः संस्थानप्रसवाबुध्येतेइत्यर्थः सपः प्रत्ययलभ्रमंतिराकरोति॰ स्त्रियेतस्येतिसकारस्येतिपाठांतरंवाउ
लकादितिसर्वोन्वपिपातेर्दुस्सुनित्यादितुव्याकरणांतरेप्यनोषसंघानहूपमितिगर्भपदेननत्कारणंशुक्रशोणितमुच्यते॰ संस्थान
परणर्थमाहतिरोभावइतिसंस्थानप्रसवाभ्यांतत्तीयमपिलभ्यतइत्याहसाम्यावस्थेतिनन्वेतासामवस्थानांसर्वत्रसत्त्वेप्रत्यभि एम॰
णाकुतोनोपलंभीतआह एताइतिशब्दगोचराएवशब्दजन्यप्रतीतिविषयाएवेत्यर्थः।यद्यपिवक्ष्यमाणान्यपिनसर्वेषुपदार्थेष्वे २

(10A)

तान्मात्रत्वमपि केनचिद्रूपेण कस्यचिदेवप्रत्यायनमित्यपि शब्दगोचराइत्यनेनोच्यते भाष्ये कस्य पुनरिति नातावेकवचनं सत्त्वेत्यादि॰ सर्वस्य
जगतः सुखदुःखमोहान्वयात्तत्कारणत्वेन सत्त्वादीनि परिकल्प्यन्ते॰ प्रकृतिस्त्रिगुणात्मिका महच्छब्दवाच्यबुद्धिरूपेण परिणमते म
हदहंकारात्मना अहंकारस्तु गंधरूपरसस्पर्शशब्दात्मकपंचतन्मात्रात्मनाथ दशेंद्रियाणि मनश्च परिणमते अत एव सत्त्वाद्यात्मकाः
शब्दादयश्च पृथिव्याद्यात्मना परिणमंते॰ तत्र पंचानां पृथ्वी चतुर्णामापः। त्रयाणां तेजः द्वयोर्वायुः। एकस्य गगनं। एवं प्रकृतिः स
र्वरूपा पुरुषभोगापवर्गार्था पुरुषश्च न प्रकृतिर्नापि विकृतिः केवलचैतन्यरूपोऽपरिणामी शुद्ध इति सांख्यसिद्धांतः। प्रकृतिरचेतना
पि चेतनस्य पुरुषस्य भोगापवर्गलक्षणमर्थं साधयितुं तत्तदृष्टादिसहकारेणेश्वरेण प्रवर्त्यते इति च सेश्वरसांख्यसिद्धांतः
तत्संघातरूपं चेति। शब्दादिसंघातरूपमित्यर्थः। न तु तद्व्यतिरिक्तमिति। अतएवाग्रे सर्वाश्च मूर्त्तय एवमात्मिका इति भाष्यकारो व
क्ष्यति संख्यानामिति सेश्वरसांख्यानामाचार्यस्य पतंजलेरित्यर्थः। गुणाग्रहो द्रव्यमिति पतंजलिरिति योगभाष्ये स्पष्टं तद्वक्ष्यति सर्वा
श्च मूर्त्तय एवमात्मिका इति सूक्ष्मावस्थानामिति प्रकृतिरूपाणामित्यर्थः। अप्रत्यक्षत्वादित्यस्यैव व्याख्यानं शब्दव्यवहारेति॰ प्र
कृतिशब्दातिरिक्तशब्दावाच्यत्वादित्यर्थः तद्व्यवस्थानामपि भावतिरोभावयोरभावात् लिंगत्रयव्यवहारानुपपत्तेरित्यपि बोध्यं॰ यद्वा
शब्दकृतव्यवहारस्य प्रवृत्तिनिवृत्तिरूपस्याविषयत्वादित्यर्थस्तत्र प्रत्यक्षत्वहेतुं परमं॰ शब्दादिरूपेण परिणतं दृष्टिपथमित्यस्य
स्थानविषयत्वमित्यर्थः शब्दादिग्रहणं तत्परिणामासामान्योपलक्षणं भाष्ये संस्थानप्रसवगुणत्वेहेतुकथनं शब्दस्पर्शतादिश

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(1)

कौ॰टी॰४ शब्दादिपदेनशब्दादितन्मात्राणि॰तेषांतिरोभावादिसंभवादित्याकःसमूहसमूहिनोःकाल्पनिकोभेदोपीतिसचपितुमत्रमतपर्यायःस्पर्शा

१० त्मकश्चेतिचात्शब्दात्मकइतिबोध्यं॰भाष्येशब्दस्पर्शौत्पाद्युपलक्षणंसत्वरजस्तमःकार्यमात्रस्यअतएवरसोगंधःपाकइत्यादौलिंग

व्यवहारनिर्वाहःपतवस्यादौरूपादीनांसुखदुःखमोहजनकतयातेषांसत्वरजस्तमोमयत्वापाःस्यषृतयातत्कथनद्वारासर्वैमत्कार्य

मुपलक्षितमितिबोध्यं॰एतेनशब्दनिष्ठमेवलिंगमितिनव्योक्तंपरास्तम्॰स्पर्शादिकथनस्यभाष्येवैयर्थ्यापत्तेः।चक्षुर्णांवरइति॰

वाघ्राकाशयोरेवंरूपत्वाभावेननाविहनविवक्षितावित्यर्थः॰वाघ्राकाशयोरितिइदमुपलक्षणंतेजसोपि॰तत्रापिरसगंधयोरभा

वात्॰नन्वेवमपिसंस्थानस्यसवगुणत्वंसर्वत्रकथमतआह भाष्येप्रवृत्तिःरवत्वपीति॰प्रवृत्तिरितिलिंगसामान्यलक्षणंनिसासार्व

दिकत्वात्सार्वत्रिकत्वाच्चतदाहसर्वपदार्थव्यापित्वमिति॰स्वपरसादिसर्वपदार्थेत्यर्थः।इदमुपलक्षणंसर्वकालव्यापित्वस्यप्रव

त्तिः रवत्वपिनिमेस्मनेनांसंतच्योभयसर्वत्रैत्वनेनाघ्रंदर्शितमितिबोध्यं॰भाष्येनहीहेतिरूपादीनामपिकादाचित्कत्वस्याप्रजीपत्तेका

चित्कत्वेइतिआविर्भावतिरोभावोसत्वत्रेत्यर्थः आविर्भावादीति॰आदिनातिरोभावस्यग्रहणा।तित्यइतिनित्यत्वंचसर्वदात्वसर्वत्रत्वप्रभावा

न॰ तच्चनहीत्यादिमाभाष्येदर्शितं॰ननुपुरुषेपरिणामानभ्युपगमात्कथंपुरुषश्चेतिश्वेतस्यमितिलिंगत्रयप्रयोगइतिशंकते

पुरुषोयद्यपीतितद्धर्मपत्वइवेतिभोग्यत्रिगुणात्मकवस्तुधर्मयत्वइत्यर्थः अयंभावः भोक्तृत्वावस्थायांभोग्यवस्तुशवलितमेव राम॰

चैतन्यंप्रतीयतेतदेवचशब्दगोचरमेवंचरमेवंचगच्छतिपुरुषइतिवत्तस्यलिंगत्रयोपपत्तिरिति।प्रवृत्तिरितीति॰अजस्त्रपरिणा १०

पा॰३३४ा॰२

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com